# નવગ્રહ સ્તોત્રં

જપા કુસુમ સંકાશં કાશ્યપેયં મહાદ્યુતિં
તમોરિં સર્વ પાપઘ્નં પ્રણતોસ્મિ દિવાકરં
દધિશંખ તુષારાભં ક્ષીરાર્ણવ સમુદ્ભવં
નમામિ શશિનં સોમં શંભોર્મુકુટભૂષણં
ધરણીગર્ભ સંભૂતં વિદ્યુત કાંતિ સમપ્રભં
કુમારં શક્તિહસ્તંતં મંગળં પ્રણમામ્યહં
પ્રિયંગુકાલિકાશ્યામં રૂપેણાપ્રતિમાંબુધં
સૌમ્યંસત્વગુણોપેતં તં બુધં પ્રણમામ્યહં
દેવાનાંચ ઋષિણાંચ ગુરુંકાંચન સન્નિભં
બુદ્ધિમંતં ત્રિલોકેશં તં નમામિ બૃહસ્પતિં
હિમકુંદમૃણાલાભં દૈત્યાનાં પરમં ગુરું
સર્વ શાસ્ત્ર પ્રવક્તારં ભાર્ગવં પ્રણમામ્યહં
નીલાંજન સમાભાસં રવિપુત્રં યમાગ્રજં
છાયામાર્તાંડ સંભૂતં તં નમામિ શનૈશ્ચરં
અર્ધકાયં મહાવીર્યં ચંદ્રાદિત્ય વિમર્ધનં
સિંહિકાગર્ભ સંભૂતં તં રાહું પ્રણમામ્યહં
ફલાષપુષ્પ સંકાશં તારકાગ્રહ મસ્તકં
રૌદ્રં રૌદ્રાત્મકં ઘોરં તં કેતું પ્રણમામ્યહં

ઇતિ વ્યાસં મુખોદ્ગીતં યઃ પઠેસ્તુ સમાહિતૌ
દિવાવાય દિવારાત્રૌ વિઘ્નઃ શાંતિર્ભવિષ્યતિ
નર નારી નૃપાણાંચ ભવે દુ:સ્વપ્ન નાશનં
ઐશ્વર્યમતુલાં તેષાં આરોગ્યં પુષ્ટિવર્ધનં
ગ્રહ નક્ષત્ર જા:પીડા સ્તસ્કરાગ્નિ સમુદ્ભવાં
તાઃ સર્વાઃ પ્રશમં યાંતિ વ્યાસો બ્રૂતે ન સંશયઃ
ઓં ઇતિ શ્રી નવગ્રહ સ્તોત્રં સંપૂર્ણં

www.yousigma.com